श्रीवेङ्कटेशो विजयतेतराम् ।

अथ कूर्मपुराणविषयानुक्रमणिका ।

अध्यायाः	विषयाः
	पूर्वार्द्धम्.
१	शौनकादिप्रश्नतत्सूतकृतकथाप्रारम्भः । समुद्रमन्थनोद्भूतलक्ष्मीमहिमवर्णनप्रसंगतो विष्णुविहितेन्द्रद्युम्नमोक्षवर्णनञ्च.
२	कूर्मरूपिणा भगवता नारदादिभ्यो निजप्रसादप्रकोपाभ्यां ब्रह्मशिवोत्पत्तिरवर्णि, लक्ष्मीर्मोहनाय मत्सृष्टौ नियोज्येति ब्रह्मणाऽभ्यर्थितेन विष्णुनाऽसन्मार्गगा एव मोहनीया इत्युक्त्वा तत्र तन्नियोगः, किञ्चित्सृष्टिवर्णनम्, वर्णाश्रमधर्मवर्णनञ्च.
३	नारदादिप्रश्नतः कूर्मकृताश्रमक्रमवर्णनम्.
४	प्राकृतसर्गवर्णनम्.
५	निमेषादिपरार्द्धान्तकालसङ्ख्याकथनम्, कालस्याऽनादीश्वरत्वोक्तिश्च.
६	नष्टस्थावरजंगमैकार्णवे सलिलान्तःप्रविष्टामवनिमुद्धरतः सनकादिस्तुतस्य वाराहरूपिणो नारायणस्य यथास्थानं धरासंस्थापनम्.
७	सृष्टिवर्णनम्.
८	स्वायम्भुवशतरूपोयज्ञसृष्टिवर्णनम्.
९	शेषशायिनः सविधमुपगते ब्रह्मणि कृत्स्नं जगन्मयि स्थितमिति परस्परवादेऽन्योऽन्योदरक्लेशः नाभिनालरन्ध्रेण निःसृतस्य ब्रह्मणः पद्मयोनित्वम्, प्राक्तनाभिमानाय शिवागमनेन मोहिताय तव जनकोऽहमप्यस्यैव पुनरिति विष्णूक्त्या निर्गर्वस्तुत्या प्रसन्नस्य वरं ब्रह्मणे दत्त्वा शिवस्य स्वधामगमनम्.
१०	मधुकैटभयोर्जिष्णुविष्णुकृतपराजयः । स्वक्रोधसमुत्पन्नरुद्रकृतसृष्टौ जरामरणरहितप्रजा वीक्ष्याऽन्यविधाः स्रष्टव्या इति ब्रह्मोक्तौ तदस्वीकारे परमात्मबुद्ध्या स्तुतः शिवस्सगणोऽन्तर्दधे.
११	शिवनियोगेन स्वसन्निधिमुपगतायै दक्षकन्या भवेतीशान्यै ब्रह्मणो नियोगात्तत्र तत्प्रादुर्भावः अथ हिमवतोऽपि ।
१२	श्रीकूर्मकृतदेवीमाहात्म्यवर्णनम्, तत्परमेश्वररूपमवलोक्य मेनाहिमवद्भ्यां स्तुता दत्ता शङ्करमुपगतवती पार्वती.
१३	दक्षकन्याख्यातिसन्ततिवर्णनम्.
१४	स्वायम्भुवमनुवंशवर्णनम्, दक्षाय शिवशापः ।

अध्यायाः	विषयाः
१५	अकल्पिताशिवांशदक्षाध्वरे विवदमानदधीचस्येशद्रोहिब्राह्मणेषु शापः वीरभद्रकृताध्वरविध्वंसोत्तरं पार्वतीप्रार्थनया दक्षदेवब्राह्मणादिषु शिवानुग्रहः
१६	दक्षकन्यावंशकथनोत्तरं हिरण्याक्षहिरण्यकशिपुवधः, न्यग्राहि च शिवेनांधकः।
१७	वामनो बलिं निगृह्य पुरन्दराय त्रैलोक्यं ददे.
१८	कश्यपवंशानुवर्णनम्.
१९	ऋषिवंशोऽनुवर्णितः.
२०	राजवंशवर्णनम्, राज्ञो वसुमनसश्चरितकथनञ्च.
२१	इक्ष्वाकुवंशवर्णने संक्षेपतो रामचरिताऽभिधानम्.
२२	पुरूरवआदिचन्द्रवंशीयनृपतिवर्णनप्रसङ्गे नृपाणां विष्णूपासनाप्रधानकत्वनिरूपणम्.
२३	जयध्वजवंशीयदुर्जयनृपस्य उर्वश्यप्सरोनुरक्तिपूर्वकं तदघक्षालनाय वाराणस्यां विश्वेश्वरदर्शनम्.
२४	संक्षेपतो यदुवंशवर्णनम्.
२५	भगवतः श्रीकृष्णस्य पुत्राभिकांक्षयोपमन्योराश्रमगमनं तत्र तदुपदेशतः पुत्रार्थं शिवाराधनमनल्पकालेन श्रीशिवप्रसादश्च.
२६	श्रीशङ्करकीर्तिवर्णनपुरस्सरं शिवलिङ्गोत्पत्तिकथनम्.
२७	श्रीकृष्णात्मजसाम्बादिराजवंशानुकीर्त्तनम्.
२८	पार्थाय व्यासदर्शनम्.
२९	युगवंशानुकीर्त्तनम्.
३०–३१	कलिदोषप्रदर्शनपूर्वकं तस्मिन्युगे शिवाराधनतः श्रेयःकथनं वाराणसीमाहात्म्यवर्णनञ्च.
३२	विश्लिष्य तत्तल्लिङ्गमाहात्म्यप्रदर्शनपुरस्सरं वाराणसीमाहात्म्यवर्णनम्।
३३	शङ्कुकर्णपिशाचोद्धारवर्णनपूर्वकं वाराणसीमाहात्म्यकथनम्.
३४	काशीवासादिनानाफलप्रदर्शनम्.
३५	वाराणसीस्थप्रधानप्रधानतीर्थवर्णनम्.
३६	प्रयागमाहात्म्यवर्णनम्.
३७	तत्र तीर्थयात्राविधिः.
३८	प्रयागे माघमासि त्रिरात्रादिवासफलम्.
३९	प्रयागवर्णने यमुनामाहात्म्यम्.
४०	भुवनविन्यासवर्णनप्रसङ्गे स्वायंभुवमनोर्वंशवर्णनम्.
४१	ज्योतिःसन्निवेशवर्णने भूर्लोकादिमानकथनम्. तत्र भुवः सूर्यादिग्रहाणां दूरतादिनिरूपणम्.
४२	सूर्यरथमभितः सप्तर्षिप्रभृतिदेवानां वेदादिस्तुतिभिरोजोवर्द्धनम्.
४३	भुवनकोशवर्णनप्रसङ्गे सूर्यप्रभावेण नक्षत्रतारकादिवृद्धिकथनमलातचक्रवद्रविभमितश्च प्रवहवायुशक्त्या चन्द्रादिभ्रमणं तेषां रथादिस्वरूपकथनञ्च।

अध्यायाः	विषयाः
४४	ध्रुवादूर्ध्वं महर्लोकादिप्रमाणकथनपूर्वकं तत्तल्लोकस्थितसनकादिदेवतानिर्देशः भूम्यधःस्थितपातालादिवर्णनञ्च.
४५	भुवनकोशे जम्ब्वादिद्वीपतत्रत्यपर्वतादिवर्णनम्.
४६	भुवनविन्यासवर्णने मेरोरुपरि ब्रह्मादिस्थितिवर्णनम्.
४७	भुवनकोशवर्णने केतुमालादिस्थितानामाहारादिकथनम्.
४८	जम्बूद्वीपवर्णने तत्तत्स्थानेषु ब्रह्मविष्ण्वादिजुष्टस्थानवैचित्र्यम्.
४९	प्लक्षादिद्वीपवर्णने तत्रतत्र कुलपर्वतादिकथनंपुरस्सरं तत्रत्यमुनिप्रभृतीनां धर्मैकपरायणत्वाभिधानम्.
५०	भुवनकोशवर्णने पुष्करद्वीपादिवर्णनंपूर्वकं संक्षेपेणानेकब्रह्माण्डकथनम्.
५१	मन्वन्तरकथने विष्णुमाहात्म्यम्.
५२	अष्टाविंशतिमनुसमभिव्याहारपुरस्सरं विष्ण्वंशपाराशरव्यासस्य यजुर्वेदस्य ऋगादिचतुर्विभागकरणम्.
५३	अष्टाविंशतिकलियुगेषु शम्भोरष्टाविंशतिधा व्यासत्वकथनम्.

इति कूर्मपुराणे पूर्वार्द्धम्.

उत्तरार्द्धम्.

अध्यायाः	विषयाः
१	ईश्वरगीता.
२	नारायणप्रमुखमुनीन्प्रति महेश्वरस्य प्रकृतिपुरुषादिविवेककथनम्.
३	ईश्वरगीतोपक्रमे अहङ्कारजीवान्तरात्मैकपर्यायकथनम्.
४	हरिहराभेदेन भक्तिकरणेऽविकल्पयोगसिद्धिः.
५	महेश्वरप्रसादाद्धरिहरात्मिकमूर्तिदर्शनेन मुनीनां कृतार्थता.
६	चराचरात्मकस्य जगत ईश्वरेच्छावशवर्तित्वकथनम्.
७	ईश्वरविभूतिकथनम्.
८	साङ्ख्यसिद्धान्ताभिधानम्.
९	ईश्वरज्ञान (स्वरूप) निरूपणम्.
१०	मुक्तिप्रदमहेश्वरज्ञानकथनम्.
११	साङ्ख्योगनिरूपणम्.
१२	ब्राह्मणकर्तव्यकर्मयोगाभिधानम्.
१३	आचारकथनम्.
१४	ब्रह्मचारिधर्मनिरूपणम्.
१५–१६	गार्हस्थ्यधर्मनिरूपणम्.
१७	भक्ष्याभक्ष्यनिर्णयः.
१८	स्नानसन्ध्याद्याह्निकम्.
१९	नित्यकर्मणि भोजनादिप्रकारवर्णनम्.
२०	श्राद्धकरणयोग्यतीर्थकथनम्.
२१	श्राद्धविषये भोज्याभोज्याद्यनेकविचाराः.

अध्यायाः	विषयाः
२२	श्राद्धपूर्वदिने ब्राह्मणनिमन्त्रणादि श्राद्धदिनकृत्यञ्च.
२३	श्राद्धकल्पे मरणाशौचनिर्णयः.
२४	द्विजानामग्निहोत्रादिकृत्यम्.
२५	द्विजातीनां वृत्तिनिरूपणम्.
२६	व्यासगीतायां दानधर्मनिरूपणम्.
२७	वानप्रस्थाश्रमधर्माः.
२८–२९	यतिधर्माः. यतिधर्मेषु विशेषः.
३०	प्रायश्चित्तनिरूपणे ब्रह्महत्याप्रायश्चित्तम्.
३१	न काश्चिन्मदधिक इत्यवलिप्तस्य ब्रह्मणः श्रीशिव (काल-भैरव) द्वारा तच्छिरः कृन्तनं ततस्तद्धत्यानिवारककपालमोचनतीर्थोत्पत्त्यादिनिरूपणम्.
३२	सुरापानादिमहापातकप्रायश्चित्ताभिधानम्.
३३	अगम्यागमनाबध्यहत्यादिप्रायश्चित्तकथनम्.
३४	स्तेयाभक्ष्यभक्षणापेयपानायाज्ययाजननित्यकर्मलोपाद्यनेककर्मप्रायश्चित्तप्रदर्शनम्, प्रसङ्गात्सीतापात्रिव्रतञ्च.
३५	प्रयागादितीर्थवर्णनम्.
३६	रुद्रकोटितीर्थविवरणपूर्वकं तदुपाख्यानम्.
३७	महालयकेदारादितीर्थकथनम्.
३८	कर्मवासनासक्तमुनिबोधाय श्रीहरस्य स्त्रीवेषधारिविष्णुना सह दारुवनप्रवेशः.
३९	छद्मनारीवेषवद्विष्णुद्वितीयहरस्य सुधायुवमुनिमनोमोहकारिणी तवेयं भार्येत्यधिक्षिप्तस्य तत एव कृत्तस्वलिंगस्यैनोमोरुमुनीनामत्युग्रतपश्चर्याचरणम्.
४०	नर्मदामाहात्म्यम्.
४१	नर्मदातीरस्थशिवलिंगमहिमा.
४२	नर्मदामाहात्म्ये भृगुतीर्थवर्णनम्.
४३	भृगुतीर्थवर्णनावसरे जप्येश्वरमहिमः.
४४	पञ्चनदादितीर्थमाहात्म्यम्.
४५	कूर्मरूपिणो भगवतः प्रतिसञ्चरवर्णनम्.
४६	प्राकृतप्रतिसर्गवर्णनोत्तरं संक्षेपतः सम्पूर्णकथोक्तिः, कूर्मपुराणफलस्तुतिश्च ।

इति श्रीकूर्ममहापुराणविषयाऽनुक्रमणिका समाप्ता ।